**रोपण** न॰ रुह-णिच्-हस्य पः ल्युट्। १जनने २अञ्जनभेदे रुप-ल्युट्। ३विमोहने ४अन्यथाभूतस्य वस्तुनोऽन्यथा ज्ञाने। अञ्जनभेदप्रकारादि भावप्र॰ उक्तं यथा "शिलायां रसकं पिष्ट्वा सम्यक् संप्लाव्य वारिणा। स्थल्लीआत्तज्जलं सर्वं त्यजेच्चूर्णमधोगतम्। शुष्कञ्च तज्जलं सर्वं पर्पटीसन्निभं भवेत्। विचूर्ण्य भावयेत् सम्यक् त्रिवेलं त्रिफलारसैः। कर्पूरस्य रसं तत्र दशमांशेन निक्षिपेत्। अञ्जयेन्नयने तेन नेत्राखिलगदच्छिदः"।

**रोपणीवर्त्ति** स्त्री नेत्राञ्जनवटीभेदे भावप्र॰तत्प्रकार उक्तो यथा "अशीतिस्तिलपुष्पाणि षष्टिः पिप्पलितण्डुलाः। जातीपुष्पाणि पञ्चाशन्मरिचानि च षोड़श। सूक्ष्मं पिष्टाम्बुना वर्त्तिः कृता कुसुमिकाभिधा। तिमिरार्जुनशुक्लानां नाशिनी मांसवृद्धिनुत्। एतस्या अञ्जने प्रोक्ता मात्रा सह हरेणुका"। (कुसुमिका वटी)।

**रोपित** त्रि॰ रुह-णिच्-हस्य पः क्त। १वृक्षादेर्जननाय कृताङ्कुरारोपणे अन्यथास्थिते अन्यरूपेण निर्दिष्टे यथा मुखं चन्द्र इत्यादौ मुखस्य चन्द्ररूपेण निर्देशः।

**रोमक** न॰ रोमेव निविडं कायति कै-क। (रुम) १नगरे सू॰सि॰। २पांशुलवणे ३अयस्कान्ते च राजनि॰।

**रोमकन्द** पु॰ रोमृणा युक्तः कन्दो मूलमस्य। पिण्डालौ राजनि॰।

**रोमकपत्तन** न॰ कर्म॰। (रुम) नगरभेदे सू॰सि॰।

**रोमकूप** पु॰ रोमृणां कूप इव। रोमाधारे विवरे "न रोमकूपौघमिषादिति" नैषधम्।

**रोमकेसर** न॰ रोमभिः केसरः सिंहसटेव। चामरे त्रिका॰

**रोमगुच्छ** न॰ रोमभिर्गुच्छं स्तवकमिव। रोमसमुदायात्मके चामरे स्वार्थे क। अत्रैवार्थे हेमच॰।

**रोमन्** न॰ रु-मनिन्। देहजाते अङ्कुराकारे केशतुल्ये पदार्थे (रोँया) अमरः।

**रोमन्थ** पु॰ रोमं मथ्नाति मन्थ-अण् पृषो॰ मलोपः। भुक्तस्य घासादेः पशुभिरुद्गीर्य्य चर्वणे। रोमन्थमभ्यस्यति क्यङ्। रोमन्थायते।

**रोमभूमि** स्त्री ६त॰। चर्मणि राजनि॰।

**रोमलता** स्त्री रोमाणि लतेव। रोमराजौ हेमच॰।

**रोमविकार** पु॰ ६त॰। रोमोद्गमे रोमाञ्चे हला॰।

**रोमश** त्रि॰ रोमाणि सन्त्यस्य श। १प्रचुररोमयुक्ते २मेषे पुंस्त्री॰ हेमच॰ स्त्रियां ङीष्। ३पिण्डालौ ४शूकरे पुंस्त्री स्त्रियां ङीष्। ५कुम्भराश्च पु॰(पाना) राजनि॰।

**रोमहर्ष** पु॰ रोमृणः हर्ष इव तद्व्यञ्जकत्वात्। रोमाञ्चे हर्षोत्सुक्यादिभिः रोमकूपे जायमाने कण्टकाकारे पदार्थे हारा॰। ल्युट्। रोमहर्षणमप्यत्र अमरः।

**रोमहर्षण** पु॰ रोमाणि हर्षयति हृष-णिच्-ल्यु। १विभीतकवृक्षे मेदि॰ २लोमहर्षणे मुनिभेदे च। [अमरः।

**रोमाञ्च** पु॰ रोमृणामञ्चः उद्गमः अन्च-अच्। रोमहर्षे

**रोमाञ्चित** त्रि॰ रोमाञ्चः जातोऽस्य तार॰इतच्। जातपुलके त्रिका॰। [ वस्थायाञ्च शब्दमा॰।

**रोमाली** स्त्री ६त॰। १रोमावलौ तदुपलक्षिते तारुण्याव-

**रोमालु** पु॰ रोमयुक्त आलुः शाक॰। १पिण्डालौ राजनि॰ रोम+आलुच्। २रोमवति त्रि॰। [वृक्षे राजनि॰।

**रोमालुविटपिन्** स्त्री रोमालुः रोमयुक्तः विटपी। कुम्भी-

**रोमावलि(ली)** स्त्री ६त॰। १रोमश्रेणौ २नाभेरुर्ध्वस्थरोमपङ्क्तौ तदुपलक्षिते ३तारुण्यावस्थायाञ्च हेमच॰।

**रोमोद्गम** पु॰ रोमृणामुद्गमः उद्-गम घञ्। रोमहर्षे हला॰। रोमोद्भेदादयोऽप्यत्र।

**रोरुदा** स्त्री रुद-यङ् भावे अ टाप्। अतिशयरोदने।

**रोल** पु॰ रु-लच। पानीयामलके शब्दच॰।

**रोलम्ब** पुंस्त्री रौति रु-विच् रौः सन् लम्बते गच्छति लम्ब-अच् कर्म॰,रोड् अम्बच् डस्य लो वा। भ्रमरे त्रिका॰ स्त्रियां ङीष्।

**रोष** पु॰ रुष-घञ्। क्रोधे अमरः।

**रोषण** पु॰रुष-युच्। १पारदे, २निकषप्रस्तरे, मेदि॰। ३ऊषरभूमौ ४क्रोधशीले त्रि॰ हेमच॰।

**रोह** पु॰ रुह-अच्। १अङ्कुरे हेमच॰ २रोहणकर्त्तरि त्रि॰॥

**रोहण** पु॰ रुह्यतेऽसौ रुह-ल्युट्। १पर्वतभेदे जटा॰। भावे ल्युट्। २प्रादुर्भावे न॰। करणे ल्युट्। ३शुक्रे राजनि॰

**रोहन्त** पु॰ रुह-झच्। १वृक्षभेदे, २वृक्षमात्रे च। ३लताभेदे, ४लतायाञ्च स्त्री उणादि॰ गौरा॰ ङीष्।

**रोहि** पु॰ रुह-इन्। १वीजे, २वृक्षे च उणादि॰। ३धार्मिके त्रि॰ सि॰ कौ॰।

**रोहिण** न॰ रुह-इनन्। पञ्चदशधा विभक्तदिनस्य नवमे भागे "कुर्य्याद्दारोहिणं बुधः" इति स्मृतिः। रोहिणी देवताऽस्य अण्। रौहिणमप्यत्र। २वटवृक्षे, ३रोहितकवृक्षे ४भूतृणे च पु॰ राजनि॰।

**रोहिणी** स्त्री रुह-इनन् गौरा॰ङीष्। १स्त्रीगव्याम् अमरः अश्विन्यवधिके चतुर्थे २नक्षत्रे ज्यो॰ ३वसुदेवपत्न्यां बलभद्रमातरि, ४विद्युति, ५कटुतुम्ब्यां, ६सोमवल्के